No. १०३२-घ

Title १: गणपतिकवचं "वज्रपञ्जरः"
२: स्कन्द पुराणे शिव कवचम्

Author

Extent १+१=२ पत्र 2 Age
१- २

Subject तन्त्र । (पुराणान्तः)
(१) २

गणेश कवचम्

(स्कन्द पुराणे)

शिव कवचम्

१०३२

२५१

श्रीगणेशायनमः ॐ श्रीभैरवौवाच महादेवीगणेशस्यवरदस्यमहात्मनः
कवचंतेप्रवक्ष्यामिवज्रपंजरकाभिदं ॐ अस्यश्रीमहागणपतिवज्रपंज
रकवचस्य श्रीनारदऋषिः गायत्रींछंदः श्रीमहागणपतिर्देवता गंबीजं
ह्रींशक्तिः कुरुकीलकं आत्मनोःवाङ्मनःकायोपार्जितपापनिवारणार्थं ॥
श्रीधर्मार्थकाममोक्षार्थेवज्रविद्यासिद्ध्यर्थेमहागणपतिवज्रपंजरकव
चपाठेविनियोगः अथगायत्री तत्पुरुषायविद्महेवक्रतुंडायधीमहि त
न्नोदंतीप्रचोदयात् ३ अथध्यानम् ओंविघ्नेशंविश्ववंद्यंस्वविपुलयशा
संलोकरक्षाप्रदक्षं साक्षात्सर्वापदासप्रशमनसमतिंपार्वतीप्राणसूनुं।
पायात्सर्वोन्तुरेंद्रात्सुरवरमनिशंसाधकैःपूज्यमानं कारुण्येनांतरा
यामितभयशमनंविघ्नराजंनमामि ॐश्रींह्रींगंशिरःपातुमहागणपति
प्रभ विनायकोललाटंमेविघ्नराजोभ्रुवोमम पातुनेत्रेगणाध्यक्षोनासि
कांमेगजाननः श्रुतीमेवतुहेरंभोगंडेमेमोदकाशनः द्वैमातुरोमुखंपातु
चाधरोपातुरंदमः दंतांममैकदंतोव्याद्वक्रतुंडोवताऽसां नांगेयोमेगलंपा
तुस्कंदोसिंहासनोवतु विघ्नांतकोभुजौपातुहस्तौमूषकवाहनः ऊरोननना
वतान्नित्यंदेवास्त्रिपुरघातनः हृदयंमेकुमारोव्याद्धयंतोपार्श्वउममकं ॥

ग० प्रद्युंनोमेवतात्स्कंधंनाभिंत्र्यंबकनंदनः कटिंनंदगणःपातुशिश्नंवीरेश्वरोवतु ।
१ मेढ्रंमेवतुसौभाग्यो भृंगिरिटीचगुह्यकं विराटकोवताद्रूरूजानुमेपुष्पदंतकः
जंघेममविकालौव्याद्गुल्फौवत्यग्रगणोवतु पादौचित्तगणःपातुपादाधोलो
हितोवतु पादपृष्ठंसुंदरोव्यान्नूपुराढ्योवपुर्मम विदारोजठरंपातुभूतानिचो
ग्ररूपकः शिरसःपादपर्यंतंवपुःसप्तगणोवतु पादादिमूर्धपर्यंतंवपुःपातु
तुचिंतकः विस्मारितंतुयत्स्थानंगणेशास्तत्सदावतु पूर्वेमांह्रींकरालोव्यादा
ग्नेयेविकरालकः दक्षिणेपातुसंहारोनैरृतेरुरुभैरवः पश्चिमायांमहाका
लोवायौकालाग्निभैरवः उत्तरेमांसिमाव्याद्धैशान्यामपितात्मकः प्रभाते
शतपत्रोव्यात्सहस्रारस्तुमध्यमे दंतमालादिनेतेव्यान्निशापात्रंसदावतु क
लत्रंमांनिशीथेव्यान्निशांतेपरशुस्तथा सर्वत्रसर्वदापातुशंखयुग्मंस
दावतु ओंओंराजकुलेहहोरणेभयह्रींह्रींहुघूतेवतात् श्रींश्रींशत्रुगृहेशौ
जलभयेक्लींक्लींवनांतेवतु ग्लौंग्लूंग्लैंग्लींसत्वभीतिषुमहाव्याध्यार्तिषु
ग्लौंगंगौ नित्यंपक्षपिशाचभूतफलिषुग्लौंगंगणेशोवतु इतीदंकवचंपु
ण्यंसर्वतंत्रेषुगोपितं वज्रपंजरनामानंगणेशस्यमहात्मनः अंगभूतंत्र १
मयंसर्वाचारैकसाधनं विधानेननसिद्धिःस्यात्सजनस्यजपस्यच तस्मात्

पञ्जनंपुण्यंपठेद्वाधारयेत्सदा तस्यसिद्धिर्महादेविकरस्थापारलौकिकी यं
यंकामयतेकामंतंतंप्राप्नोतिपाठकः अर्धरात्रेपठेन्नित्यंसर्वाभिष्टफलंल
भेत् इतिगुह्यंसुकवचंमहागणपतेःप्रियं सर्वसिद्धिमयंपुण्यंगोपयेत्पर
मेश्वरी इतिश्रीगणेशकवचंसंपूर्णं ॐ ॥ॐनमःशिवाय ॐअस्यश्री
शिवकवचस्तोत्रमंत्रस्य श्रीब्रह्माऋषिः गायत्र्यंछंदः श्रीसदाशिवोदेवता
रांबीजं रींशक्तिः रूंकीलकं आत्मनोःवाङ्मनःकायोपार्जितपापनिवारणा
र्थेममरुद्रसाक्षात्कारेशिवकवचपाठेविनियोगः अथगायत्री ॐतत्पुरुषा
यविद्महेमहादेवायधीमहि तन्नोरुद्रप्रचोदयात् अथध्यानं ॐवंदेरुद्र
उमापतिंसुरगुरुंवंदेजगत्कारणंवंदेपन्नगभोशनंशिषधरंवंदेपशूनांप
तिं वंदेसूर्यशशांकवह्निनयनंवंदेमुकुंदप्रियंवंदेशैलसुतामनोहरतरंवंदेः
शिवंशंकरं ॐसकलतत्वात्मकाय सकलतत्वविदूराय सकललोकैककर
त्रे सकललोकैकभर्त्रे सकललोकैकगुरवे सकललोकैकसाक्षिणे सकल
लोकनिगमगुह्याय सकललोकवरप्रदाय सकलदुःखार्त्तिभंजनाय सक
लजगदभयंकराय सकललोकैकशंकराय शशांकशेखराय शाश्वतनि
जावासाय निर्गुणाय निरुपमाय निराभासाय निरामयाय निःष्प्रपंचाय

त्रि० निष्कलंकाय निर्द्वंद्वाय निःसंगाय निर्मलाय निरूपमविभवाय निराधाराय
२ नित्यशुद्धपरिपूर्णसच्चिदानंदाय परमशांतप्रकाशतेजोरूपाय जयजय रुद्ररु
द्र महारौद्र वीरभद्रावतार महाभैरव कल्पांतभैरव कालभैरव कपालमालाध
र खड्ग खट्वांग चर्म पाशांकुश डमरु त्रिशूल चाप बाण गदा शक्तिः भिंडिपाल
तोमर समुसल मुद्गर प्रास पाश परिघ पट्टिस भुसुंडी शतघ्नी चक्रायुध भीषण
कर सहस्रमुख दंष्ट्राकराल विकटाट्टहास विस्फूर्जित ब्रह्मांडमंडल नागेंद्रकुं
डल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यंबक त्रिपुरांतक
विरूपाक्ष विश्वेश्वर विश्वरूप वृषभवाहन विषभूषण विश्वतोमुख सर्व
तो रक्ष २ ज्वल २ महामृत्युंजय २ अपमृत्युभयं नाशय २ रोगभयमुत्सादय २
विषसर्पभयं शमय २ चौरान्मारय २ मम शत्रूनुच्चाटय २ त्रिशूलेन विदार
य २ कुठारेण भिंधि २ खड्गेन छिंधि २ खट्वांगेन विपोथय २ मुशलेन निःशेष
य २ बाणैः संताडय २ रक्षांसि भीषय २ भूतानि विद्रावय २ कूष्मांड वेताल ना
रीगण ब्रह्मराक्षसान् संत्रासय २ ममाभयं कुरु २ वित्रस्तमाश्वासय २ नरक
भयान्मामुद्धर २ संजीवय २ क्षुत्तृडार्तिं निवारय २ दुःखातुरमानंदय २ शिव २
कवचेन मामाच्छादय २ त्र्यंबक नमस्ते २ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शि
वकवचं संपूर्णम् शुभंभवतु १९ ॥